# Devikrita Bhairavastutih

# દેવીકૃતા ભૈરવસ્તુતિઃ

## Document Information

Text title : bhairavastutiH

File name : bhairavastuti.itx

Category : shiva

Location : doc_shiva

Transliterated by : DPD

Proofread by : DPD

Description/comments : gorakShasaMhitAyAM prathamaH paTalAntargate

Latest update : May 6, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# દેવીકૃતા ભૈરવસ્તુતિઃ

નિત્યાનન્દં પરં શાન્તં નિષ્કલં ચ નિરામયમ્ ।
વ્યોમાતીતં પરં શૂન્યં ભૈરવં તં નમામ્યહમ્ ॥ ૧॥

પરાત્પરતરં શાન્તં શુદ્ધમત્યન્તનિર્મલમ્ ।
ભૂતં યેન જગત્સર્વં ભૈરવં તં નમામ્યહમ્ ॥ ૨॥

ઇડાપિઙ્ગલયોર્મધ્યે નિશ્વાશોચ્છ્વાસચારિણમ્ ।
દ્વાદશાન્તે લયં યસ્ય ભૈરવં તં નમામ્યહમ્ ॥ ૩॥

કુણ્ડલ્યાં તુ લયં યસ્ય પરાન્તે વિલયં પુનઃ ।
હરત્યમૃતરૂપેણ ભૈરવં તં નમામ્યહમ્ ॥ ૪॥

અકુલાકુલસમ્ભૂતં કુલોત્પત્તિવિવર્જિતમ્ ।
વિશ્વરૂપં પરં નિત્યં ભૈરવં તં નમામ્યહમ્ ॥ ૫॥

કલાકલઙ્કરહિતં નિર્વિકારં નિરઞ્જનમ્ ।
શૂન્યાચ્છૂન્યતરં શૂન્યં ભૈરવં તં નમામ્યહમ્ ॥ ૬॥

આપાતાલમૂર્ધ્નિસ્થં કન્દનાલસમાસ્તૃતમ્ ।
હંસરૂપં નિરાભાસં ભૈરવં તં નમામ્યહમ્ ॥ ૭॥

આકાશજ્યોતિમારૂઢં વ્યોમાતીતં નિરામયમ્ ।
વ્યોમવ્યાપિ પરંવ્યોમ ભૈરવં તં નમામ્યહમ્ ॥ ૮॥

ચન્દ્રાર્કવહ્નિમધ્યસ્થં દૃષ્ટાદૃષ્ટૈકગોચરમ્ ।
રૂપારૂપવિનિર્મુક્તં ભૈરવં તં નમામ્યહમ્ ॥ ૯॥ અનાખ્યં ચ નિરાભાસં

નાડિકાર્ણવસમ્ભૂતં મન્ત્રજાલપ્રકાશસ્થ ।
અતીતગોચરં શમ્ભું ભૈરવં તં નમામ્યહમ્ ॥ ૧૦॥

હકારાર્દ્ધં પરં સૂક્ષ્મં પરાનન્દં પરાત્પરમ્ ।
પરસ્યાન્તે પરે લીનં ભૈરવં તં નમામ્યહમ્ ॥ ૧૧॥

ઘણ્ટિકાન્તે પરં શાન્તં બ્રહ્મરન્ધ્રવિનિર્ગતમ્ ।
આકાશં નિર્મલં સૂક્ષ્મં ભૈરવં તં નમામ્યહમ્ ॥ ૧૨॥

અખણ્ડનિર્મલં શુદ્ધં કલા કલ્પવિવર્જિતમ્ । કલ્પા કલ્પ
નિત્યં પ્રમેયરહિતં ભૈરવં તં નમામ્યહમ્ ॥ ૧૩॥

યથા ભાનુગતા રશ્મિમર્વ્યાપયેન્નિખિલં જગત્ । ભાનુગતો
તથા સર્વગતં દેવં ભૈરવં તં નમામ્યહમ્ ॥ ૧૪॥

નાદાન્તબિન્દુસંલીનં શક્ત્યાતીતમગોચરમ્ ।
માલિન્યઙ્ગસમુદ્ભૂતં ભૈરવં તં નમામ્યહમ્ ॥ ૧૫॥

અનિલાનલસંયુક્તં વ્યાપકં પરમેશ્વરમ્ ।
ભુવનત્રયસંલીનં ભૈરવં તં નમામ્યહમ્ ॥ ૧૬॥

અકારાદિક્ષકારાન્તં કુલપિણ્ડસમુદ્ભવમ્ ।
કારાત્રિંશસ્વરૂપસ્થં ભૈરવં તં નમામ્યહમ્ ॥ ૧૭॥

યથા જલગતા સૂર્યશ્ચન્દ્રશ્ચાપ્સુ વ્યવસ્થિતઃ ।
તથા સર્વગતં દેવં ભૈરવં તં નમામ્યહમ્ ॥ ૧૮॥

યથા ચાગ્નિગતં તેજો યથા વાયુઃ સ્વરૂપતઃ ।
તથા સર્વગતં દેવં ભૈરવં તં નમામ્યહમ્ ॥ ૧૯॥

પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશ એવ ચ ।
પઞ્ચભૂતગતં દેવં ભૈરવં તં નમામ્યહમ્ ॥ ૨૦॥

શબ્દસ્પર્શરૂપરસગન્ધતન્માત્રપઞ્ચકમ્ ।
એતદ્વ્યાપ્ય સ્થિતં દેવં ભૈરવં તં નમામ્યહમ્ ॥ ૨૧॥

વાક્પાણિપાદપાયૂપસ્થપઞ્ચકસંસ્થિતમ્ ।
પઞ્ચકર્મેન્દ્રિયૈઃ સંસ્થં ભૈરવં તં નમામ્યહમ્ ॥ ૨૨॥

શ્રોત્રં ત્વક્ ચક્ષુષી જિહ્વા ઘ્રાણં ચૈવ તુ પઞ્ચમમ્ ।
પઞ્ચેન્દ્રિયસુસમ્ભૂતં ભૈરવં તં નમામ્યહમ્ ॥ ૨૩॥

કામઃ ક્રોધસ્તથા લોભો મોહશ્ચૈવ ચતુષ્ટયમ્ ।
અન્તઃકરણસમ્ભૂતં ભૈરવં તં નમામ્યહમ્ ॥ ૨૪॥

પક્ષિકીટૈસ્તથા વૃક્ષૈર્લતાગુલ્મસરીસૃપૈઃ ।
સવં વ્યાપ્ય સ્થિતં શમ્ભું ભૈરવં તં નમામ્યહમ્ ॥ ૨૫॥

વિકલ્પકલ્પરહિતં કલ્પનાતીતગોચરમ્ ।
વિકલ્પરહિતં શાન્તં ભૈરવં તં નમામ્યહમ્ ॥ ૨૬॥

યુગાન્તં યુગરૂપેણ અક્ષયં ચાવ્યવસ્થિતમ્ ।
સર્વવ્યાપિ પરં બ્રહ્મ ભૈરવં તં નમામ્યહમ્ ॥ ૨૭॥

સર્વતત્ત્વગતં સૂક્ષ્મં જ્ઞાનધ્યાનપરાયાણમ્ ।
નિર્લક્ષં પરમં શુદ્ધં ભૈરવં તં નમામ્યહમ્ ॥ ૨૮॥

સિદ્ધમાતરર્યોગિન્યૈર્ગુહ્યકૈઃ પાલકૈસ્તથા ।
પૂજિતં પાદપદ્મં ચ ભૈરવં તં નમામ્યહમ્ ॥ ૨૯॥

એવં દેવ્યા સ્તુતઃ શમ્ભુઃ પરાનન્દાકુલેક્ષણમ્ ।
ભૈરવો હૃષ્ટમનસા પ્રોત્ફુલ્લકમલાનનઃ ॥ ૩૦॥

પ્રસન્નો વરદો દેવો વાક્યં ચેદમુવાચ હ ।
સાધુ સાધુ મહાભાગે તુષ્ટોઽહં ભક્તવત્સલે ॥ ૩૧॥

॥ ઇતિ ગોરક્ષસંહિતાયાં પ્રથમઃ પટલાન્તર્ગતે ભૈરવસ્તુતિઃ સમાપ્તા ॥

*Devikrita Bhairavastutih*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*